द्वितीयः पाठः

Lesson - 2

रामेण कुशलवपरिग्रहः

अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥१॥

वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ ।
किं तद्येन मनोहर्तुमलं स्यातां न शृण्वताम् ॥२॥

रूपे गीते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ॥३॥

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥४॥

वयोवेषविसंवादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ॥५॥

उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥६॥

गेये केन विनीतौ वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥७॥

अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
उरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥८॥

स तावाख्याय रामाय मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम् ॥९॥

तात शुद्धा समक्षं नः स्नुषा मे जातवेदसि ।
दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥१०॥

ताः स्वचारित्र्यमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥११॥

इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥१२॥

(रघुवंशम्)

शब्दार्थाः

Meanings

प्राचेतसोपज्ञम् = (प्राचेतस + उपज्ञम्) = Firstly known to Valmiki alonenn, जगतुः = (द्वि. व.) = Sang, किन्नरस्वनौ = having the voice as that of kinaras, विसंवादि = Opposite, नाक्षिकम्पम् = without winking, व्यतिष्ठत = sat, विसिष्मिये = wondered, सावरजः = (अवरजेन सहितः) with the younger brother, वव्रे = accepted, जातवेदसि = in fire, श्रद्दधुः = had faith, agreed, प्रत्याययतु = let her prove, प्रतिपत्स्ये = I will accept, प्रतिश्रुते = when promised, आनाययामास = made to be brought

* * *